पृथगर्द्धपलैरेभिश्चूर्णितैस्तत् विमिश्रयेत् ॥
आर्द्रकस्य रसेनापि भावयेच्छोषयेत् पुनः ।
शीतोदकेन तच्चूर्णं पिबेत् प्रातर्हि मात्रया ॥
तस्मिन् जीर्णेऽन्नमश्नीयाद्यूषैर्जाङ्गलजै रसैः ।
ईषदम्लैः सलवणैः सुखोष्णैर्वह्निदीपनैः ॥
एतेनाग्निर्व्विवर्द्धेत बलमारोग्यमेव च ।
तत्रानुपानं शस्तं हि तक्रं वा भोजनं हितं ॥
मन्दाग्न्यर्शोविकारेषु वातश्लेष्मामयेषु च ।
सर्व्वाङ्गशोथरोगेषु शूलगुल्मोदरेषु च ॥
अश्मर्य्यां शर्कारायाञ्च विन्मूत्रानिलरोगिषु ।
वश्वानरक्षारः ॥ * ॥
"सामुद्रं लवणं ग्राह्यमष्टकर्षमितं बुधैः ।
सौवर्चलं पञ्चकर्षं विड़सैन्धवधान्यकं ॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णजीरकं ।
तालीशं केशरं चव्यमम्लवेतसकं तथा ॥
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ।
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकं ॥
दाड़िमं स्याच्चतुःकर्षं त्वगेले चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधं ॥
भक्षयेच्छाणमानं तत्तक्रमस्तुककाञ्जिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयं ॥
अर्शांसि ग्रहणीं कुष्ठं विवन्धञ्च भगन्दरं ।
शूलं शोथं श्वासकासावामदोषञ्च हृद्रुजं ॥
अश्मरीं शर्कराञ्चापि पाण्डुरोगं कृमीनपि ।
मन्दाग्निं नोशयेदेतद्दीपनं पाचनं परं ॥
हिताय सर्व्वलोकानां भास्करेणैतदीरितं ।
हन्यात् सर्व्वाण्यजीर्णानि भुक्तमात्रमसंशयं ॥
निम्बु रसादिकं दत्त्वा गुटिकामप्यके कुर्व्वन्ति" ॥
अथ दाड़िमस्य वीजानां चूर्णं कर्षचतुष्टयमितं देयं । भास्करलवणचूर्णं ॥*॥ सैन्धवं समूलमगधा चव्यानलनागरं पथ्या । क्रमवृद्धि ममिवृद्धै वड़वानलनामचूर्णं स्यात् ॥ वड़वानलचूर्णं ॥ * ॥ पथ्यानागरकृष्णाकरञ्जविल्वाग्निभिः सितातुल्यैः । वड़वानल इव जरयति बहुगुर्व्वपि भोजनं चूर्णं द्वितीयं वड़वानलचूर्णं ॥ * ॥
"एलात्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता ।
मरिचं पिप्पली शुण्ठी चतुःपञ्च षडुत्तरं ॥
द्रव्याण्येतानि यावन्ति तावती सितशर्करा ।
चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं" ॥
समशर्करचूर्णं ॥ * ॥
"इन्द्रासनं सप्तपलं त्रिफलायाः पलत्रयं ।
पलत्रयं त्र्यूषणस्य सितायाश्च चतुःपलं ॥
अमृता शतपुत्री च तथा कृष्णापराजिता ।
आसां चूर्णं समादाय पलमात्रं पृथक् पृथक् ॥
भावयेदेकतः सर्व्वं भृङ्गराजरसेन तु ।
स्वभाविकमिदं चूर्णं स्निग्धभाण्डे विनिक्षिपेत् ॥
विलिहन् मधुसर्पिर्भ्यां मन्दाग्नेः सहसा नरः ।
मुच्यते ग्रहणीरोगात् गुदरोगात् सजाठरात् ॥
मेहं कुष्ठञ्च वीसर्पवातरोगान् सशोणितान् ।
न चात्र परिहारोऽस्ति भोजनं सर्व्वकामिकं ॥
रोगानीकप्रशान्त्यर्थं मुनिभिः परिकीर्त्तितं ।
अस्याभ्यासात् बलं वीर्य्यं पुष्टिदृष्टियशस्तथा ॥
त्रिसप्ताहप्रयोगेण जायते नात्र संशयः ।
ज्वालामुखीचूर्णं ॥ * ॥ अथ अजीर्णे रसाः,—
"द्विपलं गन्धकं शुद्धं पलमेकन्तु पारदं ।
मृतं लोहं तथा ताम्रं कर्षद्वयमितं पृथक् ॥
संचूर्ण्य सर्व्वं संमिश्र्य द्रावयित्वाग्नियोगतः ।
सम्यग्द्रुतं समस्तं तत्पञ्चाङ्गुलदले क्षिपेत् ॥
पुनः संचूर्ण्य तत्सर्व्वं लोहपात्रे निधाय च ।
जम्बीरस्य रसं तत्र पूतं पलशतं क्षिपेत् ॥
चुल्ल्यां निवेश्य तद्यत्नात् मृदुना वह्निना पचेत् ।
रसे तस्मिन् घनीभूते तत्संशोष्य विचूर्णयेत् ॥
पञ्चकोलकषायस्य चुक्रेण सहितस्य च ।
भावनास्तत्र दातव्याः पञ्चाशत्संख्यया शनैः ॥
भृष्टटङ्कनचूर्णेन तुल्येन सह मेलयेत् ।
मरिचेनापि तुल्येन तदर्द्धेन विड़ेन च ॥
भावयेत् सप्तकृत्वस्तच्चणकाम्लजलेन च ।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत् ॥
रसः क्रव्यादनामायं भैरवानन्दयोगिना ।
उक्तः सिंहलराजाय बहुमांसाशिने पुरा ॥
भक्षयेद्भोजनस्यान्ते माषद्वयमितं रसं ।
भक्षयित्वा रसं पश्चात् पिबेत्तक्रं ससैन्धवं ॥
अतीवगुरु यद्भुक्तमतिमात्रमथापि वा ।
तत्सर्व्वं जीर्य्यति क्षिप्रं रसस्यैतस्य भक्षणात् ॥
शूलं गुल्मञ्च विष्टम्भं प्लीहानमुदरं तथा ।
रसः क्रव्यादनामायं विनिहन्ति न संशयः"
क्रव्यादो रसोऽजीर्णे ॥ * ॥ रसेन्द्रचिन्तामणौ रसरत्नप्रदीपे रसप्रदीपे च ॥
"क्षारत्रयं सूतगन्धौ पञ्चकोलमिदं शुभं ।
सर्व्वैस्तुल्या जया भृष्टा तदर्द्धा शिग्रुजा जटा ॥
एतत् सर्व्वं जयाशिग्रुवह्निमार्क्कवजैर्द्रवैः ।
भावयेत्त्रिदिनं घर्म्मे ततो लघुपुटे क्षिपेत् ॥
सप्तधार्द्रद्रवैर्घृष्टो रसो ज्वालानलो भवेत् ।
निष्कोऽस्य मधुना लीढ़ोऽनुपानं गुड़नागरं ॥
हन्त्यजीर्णमतीसारं ग्रहणीमग्निमार्द्दवं ।
श्लेष्महृल्लासवमनमालस्यमरुचिं जवात्" ॥
पञ्चकोलं,—
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं । जयात्र विजया । मार्क्कवो भृङ्गराजः । लघुपुटे गजपुटे । आर्द्रमार्द्रकं । निष्कः टङ्कः । ज्वालानलो रसोऽजीर्णे ॥ * ॥ रसप्रदीपे,—
"टङ्कणं रसगन्धौ च समं भागत्रयं विषात् ।
कपर्द्दः स्वर्ज्जिकाक्षारौ मागधी विश्वभेषजं ॥
पृथक् पृथक् कर्षमात्रं वसुभागमित्गोषणं ।
जम्बीराम्लैर्द्दिनं घृष्टं भवेदग्निकुमारकः ॥
विसूचीशूलवातादिवह्निमान्द्यप्रशान्तये" ।
क्षारीयवक्षारः । अग्निकुमारो रसो विसूच्याद्यजीर्णे ॥*॥ रसेन्द्रचिन्तामणौ,—
"शुद्धसूतं गन्धकञ्च पलमानं पृथक् पृथक् ।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं ।
चतुष्पला च विजया मर्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि घर्म्ममध्ये पुनः पुनः ।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्रेचयेदपि ।
अजीर्णारिः ॥ * ॥
" पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितं ।
तत्र जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितं ॥
वह्निमान्द्यदशवनाशनो
रामवाण इति विश्रुतो रसः ।
सङ्ग्रह ग्रहणि कुम्भकर्णक-
मामवातखरदूषणं जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः ॥
पाराभाग १ विषभाग १ लवङ्गभाग १ गन्धकभाग १ मरिचभाग ८ जायफलभाग २ । रामवाणरसोऽजीर्णे ॥ * ॥
रसेन्द्रचिन्तामणौ,—
" पलं चिञ्चाक्षारः पलपरिमितं पञ्चलवणं द्वयं सम्यक्पिष्टं भवति लघु निम्बुफलरसैः । ततस्तं तस्मिन् पलपरिमितं शङ्खशकलं क्षिपेदारान् सप्त द्रवति तदनेनैव विधिना ॥ पलप्रमाण कटुकत्रयञ्च पलार्द्धमानेन च हिङ्गुभागः । विषं पलद्वादशभागयुक्तं तावान्रसो गन्धक एव चोक्तः—
"बदरास्थिप्रमाणेन वटीमेतस्य कारयेत् ।
भक्षयेत् सर्व्वदा सा स्यात् सर्व्वाजीर्णप्रशान्तये ॥
सर्व्वोदरेषु शूलेषु विसूच्यां विविधेषु च ।
अग्निमान्द्येषु गुल्मेषु सदा शङ्खवटी हिता" ॥
शङ्खवटी अजीर्णे ॥ * ॥ रसप्रदीपे,—
"स्नुगर्कचिञ्चापामार्गरम्भातिलपलाशजान् ।
लवणान् भिषगादद्यात् प्रत्येकं पलमात्रया ॥
लवणानि पृथक् पञ्च ग्राह्याणि पलमात्रया ।
स्वर्ज्जिका च यवक्षारष्टङ्कणं त्रितयं पलं ॥
सर्व्वं त्रयोदशपलं सूक्ष्मचूर्णं विधाय तु ।
निम्बूफलरसे प्रस्थसंमिते तत् परिक्षिपेत् ॥
तत्र शङ्खस्य शकलं पलं वह्नौ प्रताप्य तु ।
वारान्निर्व्वापयेत् सप्त सर्व्वं द्रवति तद्यथा ॥
नागरं त्रिपलं ग्राह्यं मरिचञ्च पलद्वयं ।
पिप्पली पलमाना स्यात् पलार्द्धं भृष्टहिङ्गुनः ॥
ग्रन्थिकं चित्रकं चापि यवानी जीरकं तथा ।
जातीफलं लवङ्गञ्च पृथक् कर्षद्वयोन्मितं ॥
रसोगन्धो विषञ्चापि टङ्कणञ्च मनःशिला ॥
एतानि कर्षमात्राणि सर्व्वं संचूर्ण्य मिश्रयेत् ।
शरावार्द्धेन चुक्रेण संनीय वटिकाश्चरेत् ॥
माषप्रमाणा सा वैद्यैर्बृहच्छङ्खवटी स्मृता ॥
सर्व्वाजीर्णप्रशमनी सर्व्वशूलनिवारिणी ।
विसूच्यलसकादीनां सद्यो भवति नाशिनी" ॥
बृहच्छङ्खवटिका अजीर्णे ॥ * ॥
"टङ्कणकणामृतानां सहिङ्गुलानां समभागाः ।
मरिचस्य भागयुगलं निम्बुनीरैर्व्वटी कार्य्या ॥
वटिकां कलायसदृशीमेकां द्वे वा समश्नीयात् ।